नं० १०४८-घ

त्रिपुरोपनिषत् महोपनिषद्

पत्राणि ३ (सम्पूर्णम्)

नं० १०४८-घ

पत्राणि ३

त्रि॰उ॰ ओं अथ त्रिपुरोपनिषत्तल्लिख्यते ॥ ओं शब्दस्य श्रीरूपरसगंधोद
१ यः पंचपृथिव्यादयश्च परमात्मनः समुत्पन्नाः ॥ तस्माद्वा एत
स्मादात्मनः ॥ आकाशः समुद्भूतः ॥ आकाशाद्वायुः ॥ वायोरग्निः ॥ अ
ग्नेरापः ॥ अद्भ्यः पृथिवी ॥ पृथिव्या ओषधयः ॥ ओषधीभ्योऽन्नं ॥
अन्नाद्रेतः ॥ रेतसः पुरुषः ॥ इत्येवं पृथिव्यप्तेजः ॥ वायुराकाशं ॥ इं
द्रियाण्यहंकारो बुद्धिरव्यक्तमव्याकृतमित्युच्यते ॥ यत्कठिनं सा
पृथिवी यद्द्रवं तदापः ॥ यदुष्णं तदग्निः ॥ यच्चालितं तद्वायुः यत्सुषि
रं तदाकाशं ॥ तत्र पृथिवी धारणे ॥ आपः पिंडीकरणे ॥ क्लेदने च ॥
तेजः पचने प्रकाशने च ॥ वायुर्व्यूहने चालने च ॥ आकाशमवका
शः प्रदाने ॥ आकाशमेकलक्षणं ॥ द्विलक्षणो वायुः ॥ त्रिलक्षणं ते
जः ॥ आपश्चतुर्लक्षणाः ॥ पंचलक्षणा पृथ्वी ॥ शब्दगुणमाकाशं शा
नरूपं चिन्मात्रं ज्ञेयः ॥ प्रतिवार्जितं पूर्णे भन्यं मुनाभासं सर्वेभा १

संनमाम्यहं ॥ शब्दगुणमाकाशः ॥ शब्दस्पर्शः गुणो वायुः ॥ शब्दस्प
र्शरूपगुणोग्निः ॥ शब्दस्पर्शरूपरसा गुणा ह्यापः ॥ शब्दस्पर्शरूपर
सगंधेगुणाः पृथिवी ॥ इत्येतत्स्थूलशरीरं सदसदात्मकं निर्वि
षयमंतःकरणं संकल्पविकल्पात्मकं मनः ॥ निश्चयात्मिका बु
द्धिश्चेति ॥ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणइति ॥ पंचबुद्धींद्रियाणि वा
क्पाणिपादपायूपस्थइति ॥ पंचकर्मेंद्रियाणि ॥ प्राणापानव्या
नोदानसमानइति पंचवायवः ॥ मनोबुद्धिश्चित्ताहंकारमित्यं
तःकरणचतुष्टयं ॥ संकल्पविकल्पात्मकं मनः ॥ अभिमानल
क्षणोहंकारः ॥ बोद्धव्यलक्षणा बुद्धिः ॥ चेतव्यलक्षणं चित्तं ॥ म
हाप्राणो हिरण्यगर्भः ॥ परं परात्मकं सूत्रं यतो वाचो निवर्त्तंते
अप्राप्य मनसा सह ॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्च
न ॥ इत्यादिश्रुत्युक्तलक्षणं ॥ स परमात्मा इह प्रष्टः सर्वभूतेषु

त्रि·उ· स्विद्या॥श्रोत्रेणशब्दंप्रतिपद्यते॥नासिकयागंधंप्रतिपद्यते॥
२ जिव्हयारसंप्रतिपद्यते॥त्वचास्पर्शंप्रतिपद्यते॥वाच्यंवक्त
व्यंप्रतिपद्यते॥पद्भ्यांगंतव्यंप्रतिपद्यते॥वायुनाविसर्जितव्यंप्र
तिपद्यते॥उपस्थेनआनंदंप्रतिपद्यते॥मनसास्मर्त्तव्यंप्रति
पद्यते॥बुद्ध्याबोद्धव्यंप्रतिपद्यते॥अहंकारेणअहंकर्त्तव्यंप्र
तिपद्यते॥चित्तेनचेतव्यंप्रतिपद्यते॥कर्त्ताजीवः॥विज्ञानंआ
त्मामणिरिवोपाधिविशेषाजीवइत्युच्यते॥तंविदित्वाक
र्त्तारमात्मानंनलिप्यते॥कर्मणापातकेनइत्येतेसूक्ष्मशरीरं
श्रोत्रमध्यात्मनश्रोतव्यमधिभूतंदिक्तत्राधिदैवतं॥चक्षु
रध्यात्मंद्रष्टव्यमधिभूतंसूर्यस्तत्राधिदैवतं॥जिव्हाअ
ध्यात्मंरसितव्यमधिभूतंवरुणस्तत्राधिदैवतं॥त्वगध्या
त्मंस्पर्शितव्यमधिभूतंक्षेत्रज्ञस्तत्राधिदैवतं॥नासाअध्या २

त्वं घ्रातव्यमधिभूतं वायुस्तत्राधिदैवतं॥वाचाअध्यात्मं वक्तव्य
मधिभूतं अग्निस्तत्राधिदैवतं॥हस्तावध्यात्मंग्रहीतव्यमधिभू
तं इंद्रस्तत्राधिदैवतं॥पादावध्यात्मंगंतव्यमधिभूतं विष्णुस्तत्रा
धिदैवतं॥पायुरध्यात्मंविसर्जितव्यमधिभूतंमित्रस्तत्राधिदैव
तं॥उपस्थअध्यात्मंउपस्थानव्यमधिभूतं अग्निस्तत्राधिदैवतं
मनोध्यात्मंमंतव्यमधिभूतं चंद्रस्तत्राधिदैवतं॥चित्तमध्यात्मं
चेतव्यमधिभूतं ईश्वरस्तत्राधिदैवतं॥अहंकारअध्यात्मंअहंक
र्तव्यमधिभूतंअग्निस्तत्राधिदैवतं॥बुद्धिरध्यात्मंबोधव्यमधि
भूतंब्रह्मातत्राधिदैवतं॥एवमध्यात्माधिभूतमाधिदैवतं चतत्स
र्वं मुक्तं॥स परमात्मा साक्षी त्र्यज्ञोनिर्विकल्पोनिरवद्योनिर्गुणोनिरं
जनः॥सर्वगतः सर्वव्यापी सर्वज्ञः नित्योविरजोअथर्ववान॥परं
ब्रह्मविज्ञानमानंदं ब्रह्मअयमात्माब्रह्म सर्वं खल्विदं ब्रह्म॥अद्दि

त्रि-उ- नीयं ब्रह्म ॥ सत्यज्ञानमनंतं ब्रह्म ॥ तदेव देवमिति उच्यते ॥ मोक्ष महात्मा
२ गं ध्येयमलकमितिवत् ॥ द्वितीयं परं शरीरं आत्मानं न जानाति घटव
३ त्स्वप्रकाशत्वात् ॥ सुषुप्ती इंद्रियमनोबुध्यादीनामभावे शब्दादयो न ज्ञा
यंते ॥ नात्माभाव इति कथं मध्ये प्रदीपवत् ॥ स्वभावो न प्रकाशयति
तेन भासा सर्वमिदं विभाति ॥ न तत्र सूर्य्यो भाति ॥ न चंद्रमा तारा ने
मा विद्युतो भांति कुतोयमग्निः ॥ तमेव भांतमनुभाति सर्वं तस्य भा
सा सर्वमिदं विभाति ॥ जाग्रति विश्वः ॥ स्वप्ने तैजसः सुषुप्तौ प्राज्ञः ज्ञा
न घटनं तुर्य्ये ॥ नेत्रस्थं जाग्रतं विद्यात् कंठे स्वप्नं विनिर्दिशेत् सु
हृदयस्थं
षुप्तं तुरीयं मूर्ध्नि स्थितं स एव निर्विशेषः स एव परं ब्रह्म इति तैत्ती
रे इति त्रिपुरोपनिषत्समाप्तेति ॥ अथ ॥ पयो दधि घृतं क्षौद्रं धुसृणं
रक्तचंदनं कर्पूरं स्वर्णसंयुक्तं जलं आसिद्धार्थं चंदनं कुशाद्दुर्वौषधी
जातीफलं तैत्रं पुरपुष्पकं एते षोडशभिर्द्रव्यैः श्रीचक्रं स्नानमाचरेत् २
उपनिषत्संपूर्णं शुभमस्तु श्रीरस्तु ॐ तत्सत् ब्रह्मार्पणमस्तु श्रीरामजी